श्री अन्नपूर्णा कवचं

श्री अन्नपूर्णा कवचं

द्वात्रिंशद्वर्णमंत्रोऽयं शंकरप्रतिभाषितः |
अन्नपूर्णा महाविद्या सर्वमंत्रोत्तमोत्तमा ||1||

पूर्वमुत्तरमुच्चार्य संपुटीकरणमुत्तमं |
स्तोत्रमंत्रस्य ऋषिर्ब्रह्मा छंदो त्रिष्टुबुदाहृतः ||2||

देवता अन्नपूर्णा च ह्रीं बीजमंबिका स्मृता |
स्वाहा शक्तिरिति ज्ञेयं भगवति कीलकं मतं ||3||

धर्माऽर्थ-काम-मोक्षेषु विनियोग उदाहृतः |
ॐ ह्रीं भगवति माहेश्वरि अन्नपूर्णायै स्वाहा |
सप्तार्णवमनुष्याणां जपमंत्रः समाहितः ||4||

अन्नपूर्णे इमं मंत्रं मनुसप्तदशाक्षरं |
सर्व संपत्प्रदो नित्यं सर्वविश्वकरी तथा ||5||

भुवनेश्वरीति विख्याता सर्वाऽभीष्टं प्रयच्छति |
हृल्लेखेयमिति ज्ञेयमोंकाराक्षररूपिणी ||6||

कांति-पुष्टि-धना-ऽऽरोग्य यशांसि लभते श्रियं |
अस्मिन् मंत्रे रतो नित्यं वशयेदखिलं जगत् ||7||

अंगन्यासः -- ॐ अस्य श्रीअन्नपूर्णामालामंत्रस्य ब्रह्मा ऋषये
नमः शिरसि | ॐ अन्नपूर्णादेवतायै नमः हृदये | ॐ ह्रीं बीजाय नमः
नाभौ | ॐ स्वाहा शक्तये नमः पादयोः | ॐ धर्मा-ऽर्थ-काम-मोक्षेषु
विनियोगाय नमः सर्वांगे |
करन्यासः -- ॐ ह्रां अंगुष्ठाभ्यां नमः | ॐ ह्रीं तर्जनीभ्यां
नमः | ॐ ह्रूँ मध्यमाभ्यां नमः | ॐ ह्रैं अनामिकाभ्यां नमः |
ॐ ह्रौं कनिष्ठिकाभ्यां नमः | ॐ ह्रः करतलकरपृष्ठाभ्यां नमः |
हृदयादिन्यासः -ॐ ह्रां हृदयाय नमः | ॐ ह्रीं शिरसे
स्वाहा | ॐ इह शिखायै वषट् | ॐ ह्रैं कवचाय हुं | ॐ ह्रौं

नेत्रत्रयाय वौषट् | ॐ ह्रः अस्त्राय फट् |

ध्यानं -

रक्तां विचित्रवसनां नवचंद्रचूडां

अन्नप्रदान-निरतां स्तनभारनम्रां |

नृत्यंतमिंदु सकलाभरणं विलोक्य

हृष्टां भजे भगवतीं भव-दुःख-हंत्रीं |

मालामत्रः -ॐ ऐं ह्रीं श्रीं क्लीं नमो भगवति माहेश्वरि

अन्नपूर्णे ! ममाऽभिलषितमन्नं देहि स्वाहा |

ॐ ऐं ह्रीं श्रीं क्लीं मंदार-कल्प-हरिचंदन-पारिजात-मध्ये

शशांक-मणिमंडित-वेदिसंस्थे |

अर्धेंदु-मौलि-सुललाट-षडर्धनेत्रे भिक्षां

प्रदेहि गिरिजे! क्षुधिताय मह्यं क्लीं श्रीं ह्रीं ऐं ॐ ||1||

ॐ ऐं ह्रीं श्रीं क्लीं केयूर-हार-कनकांगदकर्णपूरे कांचीकलाप-

मणिकांति-लसद्दुकूले | दुग्धा-ऽन्नपात्र-वर-कांचन-दर्विहस्ते

भिक्षां प्रदेहि गिरिजे! क्षुधिताय मह्यं

ॐ क्लीं श्री ह्रीं ऐं ॐ ||2||

ॐ ऐं ह्रीं श्रीं क्लीं आली कदंबपरिसेवित-पार्श्वभागे

शक्रादिभिर्मुकुलितांजलिभिः पुरस्तात् | देवि! त्वदीयचरणौ शरणं

प्रपद्ये भिक्षां प्रदेहि गिरिजे! क्षुधिताय मह्यं

ॐ क्लीं श्रीं ह्रीं ऐं ॐ ||3||

ॐ ऐं ह्रीं श्रीं क्लीं गंधर्व-देवऋषि-नारद-कौशिकाऽत्रि-व्यासा-

ऽम्बरीष-कलशोद्भव-कश्यपाद्याः |

भक्त्या स्तुवंति निगमा-ऽऽगम-सूक्त-

मंत्रैर्भिक्षा प्रदेहि गिरिजे! क्षुधिताय मह्यं क्लीं

ॐ श्रीं ह्रीं ऐं ॐ ||4||

ॐ ऐं ह्रीं श्रीं क्लीं लीलावचांसि तव देवि! ऋगादिवेदाः

सृष्ट्यादिकर्मरचना भवदीयचेष्टा | त्वत्तेजसा जगदिदं प्रतिभाति

नित्यं भिक्षां प्रदेहि गिरिजे! क्षुधिताय मह्यं क्लीं श्रीं ह्रीं ऐं ॐ ||5||

ॐ ऐं ह्रीं श्रीं क्लीं शब्दात्मिके शशिकलाभरणार्धदेहे शंभो-
रुरस्थल-निकेतननित्यवासे | दारिद्र्य-दुःखभयहारिणि का त्वदन्या
भिक्षां प्रदेहि गिरिजे ! क्षुधिताय मह्यं क्लीं श्रीं ऐं ॐ ||6||

ॐ ऐं ह्रीं श्रीं क्लीं संध्यात्रये सकलभूसुरसेव्यमाने स्वाहा स्वधासि
पितृदेवगणार्तिहंत्री | जाया सुताः परिजनातिथयोऽन्नकामाः भिक्षां
प्रदेहि गिरिजे! क्षुधिताय मह्यं क्लीं श्रीं ह्रीं ऐं ॐ ||7||

ॐ ऐं ह्रीं श्रीं क्लीं सद्भक्तकल्पलतिके भुवनं कवंद्ये भूतेश-
हृत्कमलमग्न-कुचाग्रभृंगे |
कारुण्यपूर्णनयने किमुपेक्षसे मां भिक्षां
प्रदेहि गिरजे क्षुधिताय मह्यं क्लीं श्रीं ह्रीं ऐं ॐ ||8||

ॐ ऐं ह्रीं श्रीं क्लीं अंब! त्वदीय-चरणांबुज-संश्रयेण ब्रह्मादयो-
ऽप्यविकलां श्रियमाश्रयंते | तस्मादहं तव नतोऽस्मि पदारविंदे
भिक्षां प्रदेहि गिरिजे! क्षुधिताय मह्यं क्लीं श्रीं ह्रीं ऐं ॐ ||9||

ॐ ऐं ह्रीं श्रीं क्लीं एकाग्रमूलनिलयस्य महेश्वरस्य प्राणेश्वरि!
प्रणत-भक्तजनाय शीघ्रं | कामाक्षि-रक्षित-जगत्-त्रितयेऽन्नपूर्णे
भिक्षां प्रदेहि गिरिजे! क्षुधिताय मह्यं क्लीं श्रीं ह्रीं ऐं ॐ ||10||

ॐ ऐं ह्रीं श्रीं क्लीं भक्त्या पठंति गिरिजादशकं प्रभाते
मोक्षार्थिनो बहुजनाः प्रथितान्नकामाः | प्रीता महेशवनिता हिमशैल-
कन्या तेषां ददाति सुतरां मनसेप्सितानि क्लीं श्रीं ह्रीं ऐं ॐ ||11||

इति श्रीशंकराचार्यविरचितमन्नपूर्णाकवचं समाप्तं |